# CLASS NOTES

| | |
|---|---|
| Class: दशमी (X) | Topic: Question Bank – Set 1 |
| Subject: संस्कृतम् | Prepared by – Nemish Tripathi |

1. अधोलिखितवाक्येषु रेखांकितपदस्य सन्धिपदं/ सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत –

1) युष्मत् + दर्शनात् कुशलमिव।
(क) युष्मत्दर्शनात्
(ख) युष्मद्दर्शनात्
(ग) युष्मद् दर्शनात्

2) यतो हि अयमन्येभ्यो दुर्बलः।
(क) यतोर् + हि
(ख) यतः + हि
(ग) यतस् + हि

3) शरीरस्य सत् + निवेशः समरूप एव।
(क) सन्निवेशः
(ख) सत्निवेशः
(ग) सद्निवेशः

4) मेघरवैः + च सह वर्षा तत्राभवत्।
(क) मेघरवैस्च
(ख) मेघरवैर्च
(ग) मेघरवैश्च

5) अयम् बलीवर्दः अन्येभ्यः + दुर्बलः।
(क) अन्येभ्योऽदुर्बलः
(ख) अन्येभ्यो दुर्बलः
(ग) अन्येभ्योर्दुर्बलः

6) तस्मादङ्क – व्यवहितमध्यास्यतां सिंहासनम्।
(क) तस्मात् + अङ्क
(ख) तस्माद् + अङ्क
(ग) तस्मान् + अङ्क

7) सः कृच्छ्रेण भारम् उद्वहति।
(क) उद् + वहति
(ख) उत् + वहति

(ग) उन् + वहति

8) अचिरादेव तत्र प्रवर्षः समजायत।

(क) अचिरात् + एव

(ख) अचिराता + एव

(ग) अचिराद + एव

9) कुसुमावलिः समीरचालिता स्यान्मे वरणीया।

(क) स्याद् + मे

(ख) स्यात् + मे

(ग) स्यात + मे

10) महानगरमध्ये चलत् + अनिशं कालायसचक्रम्।

(क) चलतनिशं

(ख) चलदानिशं

(ग) चलदनिशं

11) पाषाणी सभ्यता निसर्गे स्यात् + न समाविष्टा।

(क) स्यान्न

(ख) स्याद्न

(ग) स्यान् आ

12) त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

(क) यन् + मानुषादपि

(ख) यत् + मानुषादपि

(ग) यत + मानुषदपि

13) अन्यः + अपि बुद्धिमान् लोके भयात् मुच्यते।

(क) अन्योऽपि

(ख) अन्योपि

(ग) अन्येऽपि

14) कः + चित् धूर्तः श्रृगालः हसन्नाह।

(क) कस्चित्

(ख) कष्चित्

(ग) कश्चित्

15) व्याघ्रोऽपि सहसा नष्टः।

(क) व्याघ्रः + अपि

(ख) व्याघ्राः + अपि

(ग) व्याघ्रः + आपि

16) मया शीघ्रं <u>तदग्रतः</u> नष्टः ।

(क) तत् + अग्रतः

(ख) तत + अग्रतः

(ग) तदा + अग्रतः

17) बालभावात् <u>हिमकरोऽपि</u> पशुपतिमस्तके व्रजति ।

(क) हिमकरः + अपि

(ख) हिमकरो + रपि

(ग) हिमकरस् + अपि

18) <u>वयसः + तु</u> न किञ्चिदन्तरम् ।

(क) वयसास्तु

(ख) वयसस्तु

(ग) वयसर्तु

19) <u>वयः + अनुरोधात्</u> शिशुजनः लालनीयः ।

(क) वयोनुरोधात्

(ख) वयोऽनुरोधात्

(ग) वयोननुरोधात्

20) तयोः बलीवर्दयोः एकः <u>अशक्तः + चासीत्</u> ।

(क) अशक्तस्चासीत्

(ख) अशक्तश्चासीत्

(ग) अशक्तष्चासीत्

## 2. अधोलिखितवाक्येषु रेखांकितपदानाम् समासं/विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत –

1) अपूर्वोऽयं मानवानां <u>सरस्वत्यावतारः</u> ।

(क)सरस्वत्याम् अवतारः

(ख) सरस्वत्याः अवतारः

(ग)सरस्वत्या अवतारम्

2) कृषकः <u>हर्षस्य अतिरेकेण</u> गृहमगात् ।

(क) हर्षातिरेकेण

(ख) हर्षातिरेकम्

(ग) हर्षातिरेकः

3) ततः <u>तापसौ</u> प्रविशतः ।

(क) तापसः च तापसाः च

(ख) तापसः च तापसः च

(ग) तापसाः च तापसाः च

4) सव्यवधानं न चारित्रलोपाय ।

(क) व्यवधानस्य सहितं

(ख) व्यवधाने सहितं

(ग) व्यवधानेन सहितं

5) विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिपः ।

(क)त्रयाणाम् दशानाम् अधिपः

(ख) तिसृणाम् दशानाम् अधिपम्

(ग)तिसृणाम् दशानाम् अधिपः

6) सहस्रात् अधिकम् तेषु पुत्रेषु अस्मिन्नेव वात्सल्यं कथम् ?

(क)सहस्राधिकेषु

(ख) सहस्राधिकाः

(ग)सहस्राधिकाणाम्

7) एतेन वचनेन दारकौ निर्भर्त्सयति ।

(क) दारकः च दारकः च

(ख) दारकौ च दारकौ च

(ग) दारकाः च दारकाः च

8) प्रस्तरतले लताश्च तरवश्च गुल्माश्च नो भवन्तु पिष्टाः ।

(क) लतातरुगुल्माः

(ख) लताःतरवःगुल्माः

(ग) लतातरुगुल्मान्

9) प्रस्तरतले प्रकृतिः समाविष्टा न स्यात् ।

(क) प्रस्तराय तले

(ख) प्रस्तराणाम् तले

(ग) प्रस्तरे तले

10) कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।

(क) मलानाम् सहितम्

(ख) मलस्य सहितम्

(ग) मलेन सहितम्

11) सुरभिवचनं श्रुत्वा इन्द्रस्य हृदयमद्रवत् ।

(क)सुरभस्य वचनं

(ख) सुरभेः वचनम्

(ग) सुरभये वचनम्

12) सूर्यं च चन्द्रः च तयोः को वा भवतोर्वंशस्य कर्त्ता ?

(क) सूर्यचन्द्रौ

(ख) सूर्यचन्द्रस्य

(ग) सूर्यचन्द्रयोः

13) कृषकः बलीवर्दः च बलीवर्दः च ताभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत् ।

(क) बलीवर्दयोः

(ख) बलीवर्दौ

(ग) बलीवर्दाभ्याम्

14) अत्र मलानाम् अभावः जलम् नास्ति ।

(क) निष्मलं

(ख) निर्मलं

(ग) निर्मलः

15) प्रत्यक्षम् एव मया स्वपुत्रौ चपेटया प्रहरन्ती दृष्टा ।

(क) प्रत्यस्य अक्षम्

(ख) अक्षम् अक्षम्

(ग) अक्षस्य समीपं

16) भयाकुलं व्याघ्रं दृष्ट्वा श्रृगालः अवदत् ।

(क) भयेन आकुलं

(ख) भयात् आकुलं

(ग) भयस्य आकुलं

17) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।

(क) पुत्रद्वयोनेपेता

(ख) पुत्रद्वयोनेपेता

(ग) पुत्रद्वयोपेता

18) किं द्वयोरप्येकमेव वचनं वचनं प्रति ।

(क) प्रत्यवचनः

(ख) प्रत्यवचनम्

(ग) प्रतिवचनम्

19) अहो ! हृदयग्राही स्पर्शः ।

(क) हृदयेन ग्राही

(ख) हृदयात् ग्राही

(ग) हृदयस्य ग्राही

20) चण्डवातेन <u>मेघानाम् रवः तैः</u> सह प्रवर्षः अभवत् ।

(क) मेघरवः

(ख) मेघरवस्य

(ग) मेघरवैः

21) <u>भ्रातरः च भ्रातरः च</u> आवाम् सोदर्यौ ।

(क) भ्रातरः

(ख) भ्रातरौ

(ग) भ्रात्रोः

22) तयोः <u>बलीवर्दयोः</u> एकः शरीरेण दुर्बलः आसीत् ।

(क) बलीवर्दः च बलीवर्दः च तयोः

(ख) बलीवर्दः च बलीवर्दः च

(ग) बलीवर्दः च बलीवर्दः च तस्य

23) अस्मिन् <u>तपोवने</u> तस्य नाम व्यवहरति ।

(क) तपसे वने

(ख) तपसा वने

(ग) तपसः वने

24) <u>सुराधिपः</u> ताम् अपृच्छत् ।

(क) सुरेषु अधिपः

(ख) सुराणाम् अधिपः

(ग) सुराणाम् अधिपम्

25) <u>कुशः च लवः च</u> रामस्य पुत्रौ ।

(क) कुशलवाः

(ख) कुशलवः

(ग) कुशलवौ

3. अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरं प्रदत्तविकल्पेभ्यः चिनुत –

1) पशुपति – मस्तक – केतक – <u>छद् + त्व</u> ।

(क) छदत्वम्

(ख) छदत्वः

(ग) छदत्वानि

2) यत्रास्ते सा धूर्ता तत्र गम्यताम् ।

(क) धूर्त + टाप्

(ख) धूर्ता + टाप्

(ग) धूर्त + आ

3) लोके बुद्धिमान् महतो भयात् मुच्यते ।

(क) बुद्धि + मान्

(ख) बुद्धि + मतुप्

(ग) बुद्धि + णिनि

4) बुद्धिः बल + मतुप् तन्वि सर्वकार्येषु सर्वदा ।

(क) बलवती

(ख) बलमती

(ग) बलवान्

5) हरिततरूणाम् ललितलतानाम् माला रमणीया ।

(घ) रमणीय + टाप्

(ङ) रमणीया + टाप्

(च) रमण + ईया

6) व्याघ्रं दृष्ट्वा बुद्धि + मतुप् चिन्तितवती ।

(क) बुद्धिमान्

(ख) बुद्धिमत्

(ग) बुद्धिमती

7) सर्वेष्वपत्येषु जननी तुल्यवत्सला |

(क) वत्सल + तल्

(ख) वत्सल + टाप्

(ग) वत्सला + मतुप्

## 4. अधोलिखितवाक्येषु रेखांकितपदस्य प्रश्ननिर्माणवाचकपदं प्रदत्तविकल्पेभ्यः चिनुत–

1. शकटीयानम् कज्जलमलिनं धूमम् मुञ्चति ।

(क) किम्

(ख) कीदृशं

(ग) कम्

2. उद्याने पक्षिणां कलरवं चेतः प्रसादयति ।

(क) कासाम्

(ख) किम्

(ग) केषाम्

3. पाषाणीसभ्यतायां लतातरुगुल्माः प्रस्तरतले पिष्टाः सन्ति ।

(क) काः

(ख) के

(ग) कया

4. महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति ।

(क) कस्मिन्

(ख) कुत्र

(ग) कदा

5. व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत् ।

(क) कः

(ख) किम्

(ग) कीदृशः

6. व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत् ।

(क) किम्

(ख) कम्

(ग) काम्

7. त्वं मानुषात् बिभेषि ।

(क) कस्मात्

(ख) केन

(ग) कस्य

8. पुरा त्वया मह्यम् व्याघ्रत्रयं दत्तम् ।

(क) कम्

(ख) कस्मै

(ग) केभ्यः

9. व्याघ्रः श्रृगालेन सहितं पुनः आगच्छत् ।

(क) केन

(ख) कया

(ग) किम्

10. कुशलवौ रामम् उपसृत्य प्रणमतः ।

(क) किम्

(ख) कम्

(ग) काम्

11. <u>तपोवनवासिनः</u> कुशस्य मातरं देवी इति नाम्ना आह्वयन्ति ।

(क) कः

(ख) काः

(ग) के

12. वयोऽनुरोधात् <u>शिशुजनः</u> लालनीयः भवति ।

(क) कः

(ख) के

(ग) काः

13. <u>तपोवने</u> लवकुशयोः पितुर्नाम न व्यवह्रियते ।

(क) कदा

(ख) कुत्र

(ग) केषु

14. रामाय कुशलवयोः स्पर्शः <u>हृदयग्राही</u> आसीत् ।

(क) कीदृशी

(ख) कीदृशः

(ग) का

15. रामः कुशलवौ <u>सिंहासनम्</u> उपवेशयितुम् कथयति ।

(क) कम्

(ख) कुत्र

(ग) किम्

16. दुर्बले सुते <u>मातुः</u> अभ्यधिका कृपा भवति ।

(क) कस्य

(ख) कयोः

(ग) कस्याः

17. मे <u>बहूनि</u> अपत्यानि सन्ति ।

(क) किम्

(ख) कानि

(ग) कम्

18. सुरभेः नेत्राभ्याम् <u>अश्रूणि</u> आविरासन् ।

(क) काम्

(ख) कः

(ग) कानि

19. दीने पुत्रे तु माता <u>कृपार्द्रहृदया</u> भवेत् ।

(क) कासु

(ख) कया

(ग) कीदृशी

20. कृषकः <u>बलीवर्दाभ्यां</u> क्षेत्रकर्षणं कुर्वन्नासीत् ।

(क) काभ्याम्

(ख) केन

(ग) कस्य

5. अधोलिखितवाक्येषु भाषिककार्यसम्बद्धानां प्रश्नानाम् समुचितं उत्तरम् प्रदत्तविकल्पेभ्यः चिनुत–

1. "दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम् ।" अस्मिन् वाक्ये विशेष्यपदं किम् ?

(क) दुर्दान्तैः

(ख) दशनैः

(ग) अमुना

2. " समलं धरातलम् ।" अत्र विशेषणपदं किम् ?

(क) समलं

(ख) धरातलम्

(ग) जलम्

3. " करणीयं बहिरन्तर्जगति तु बहुशुद्धीकरणम् ।" अस्मिन् वाक्ये 'अशुद्धीकरणम्' इत्यस्य किम् विलोमपदं प्रयुक्तम् ?

(क) बहु

(ख) जगति

(ग) शुद्धीकरणम्

4. " वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।" अत्र 'स्वच्छम्' इत्यर्थे किम् पर्यायपदं प्रयुक्तम् ?

(क) भृशम्

(ख) जलम्

(ग) निर्मलम्

5. "मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।" अस्मिन् वाक्ये क्रियापदं किम् ?

(क) सा

(ख) व्याघ्रं

(ग) ददर्श

6. "मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।" अत्र 'वने' इत्यर्थे किम् पदं प्रयुक्तम् ?

(क) गहने

(ख) कानने

(ग) मार्गे

7. " पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते ।" अस्मिन् वाक्ये 'पुरा' इत्यस्य किम् विलोमपदं प्रयुक्तम् ?

(क) पश्चाद्

(ख) अन्यः

(ग) द्वितीयः

8. "तस्य भार्या पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।" अत्र 'पत्नी' इत्यर्थे किम् पर्यायपदं प्रयुक्तम् ?

(क) चलिता

(ख) भार्या

(ग) उपेता

9. "गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः ।" अत्र 'तूर्णम्' इत्यस्य समानार्थकपदं किम् दत्तम् ?

(क) नष्टः

(ख) जीवितः

(ग) शीघ्रम्

10. "विदूषकः – (उपसृत्य) आज्ञापयतु भवान् ।" अत्र 'समीपं गत्वा' इत्यर्थे किम् पदं प्रयुक्तम् ?

(क) गहने

(ख) कानने

(ग) मार्गे

11. "किम् नामधेया युवयोर्जननी।" अस्मिन् वाक्ये 'जनकः' इत्यस्य किम् विलोमपदं प्रयुक्तम् ?

(क) नामधेया

(ख) जननी

(ग) युवयोः

12. "तस्याः द्वे नामनी ।" अत्र कर्तृपदं किम् प्रयुक्तम् ?

(क) चलिता

(ख) भार्या

(ग) उपेता

13. "कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत ।" अस्मिन् वाक्ये क्रियापदं किम् ?

(क) कृषकः

(ख) तोदनेन

(ग) अवर्तत

14. "क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्।" अत्र 'अनेकवारम्' इत्यर्थे किम् पदं प्रयुक्तम् ?

(क) बहुवारम्

(ख) उत्थापयितुं

(ग) कृषीवलः

15. "कृषकः दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत ।" अस्मिन् वाक्ये किम् विशेषणपदं प्रयुक्तम् ?

(क) तोदनेन

(ख) वृषभं

(ग) दुर्बलं

16. "सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।" अत्र कर्तृपदं किम् प्रयुक्तम् ?

(क) सुरभेः

(ख) सुराधिपः

(ग) अपृच्छत्

17. “सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात ।“ अत्र क्रियापदं किम् दत्तम् ?

(क) हलमूढ्वा

(ख) गन्तुमशक्तः

(ग) पपात

18. “ करणीयं बहिरन्तर्जगति तु बहुशुद्धीकरणम् ।“ अत्र क्रियापदं किम् ?

(क) करणीयम्

(ख) शुद्धीकरणम्

(ग) जगति

Total questions - 90

** एषा पाठ्यसामग्री पूर्णरूपेण गृहे एव निर्मिता |